## उपसर्गाः क्रियायोगे । (५९/२२)

प्रादयः क्रियायोगे उपसर्गसञ्ज्ञा भवन्ति । प्रणयति । परिणयति । प्रणायकः । परिणायकः (८.४.१४/२२८७) । क्रियायोगे इति किम्? [1]प्रगतो नायकोऽस्माद् देशात्, प्रनायको देशः ।

[६७] मरुच्छब्दस्य चोपसङ्ख्यानं [2]कर्तव्यम् । (म.भा. १.३४१)

मरुद्भिर्दत्तो मरुत्तः । सञ्ज्ञाविधानसामर्थ्यादनजन्तत्वेऽपि 'अच उपसर्गात्तः' (७.४.४७/३०७८) इति तत्वं भवति ।

[६८] श्रच्छब्दस्योपसङ्ख्यानम् । (म.भा. १.३४१)

'आतश्चोपसर्गे' (३.३.१०६/३२८३) इति अङ्[3] भवति – श्रद्धा । उपसर्गप्रदेशाः—'उपसर्गे घोः किः' (३.३.९३/३२७०) इत्येवमादयः ॥

## गतिश्च । (६०/२३)

गतिसञ्ज्ञकाश्च प्रादयो भवन्ति क्रियायोगे । प्रकृत्य (२.२.१८/७६१) । प्रकृतम् (६.२.४९/३७८३) । यत्प्रकरोति[4] (८.१.३०/३९३७) । योगविभाग उत्तरार्थः । उत्तरत्र गतिसञ्ज्ञैव यथा स्यात् । उपसर्गसञ्ज्ञा मा भूत् । [5]ऊरीस्यात् इत्यत्र 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' (८.३.८७/२४७२) इति षत्वं [6]प्रसज्येत । चकारः सञ्ज्ञासमावेशार्थः । प्रणीतम् । अभिषिक्तम् । 'गतिरनन्तरः' (६.२.४९/३७८३) इति स्वरः, 'उपसर्गात्°' (८.४.१४/२२८७) (८.३.६५/२२७०) इति णत्वषत्वे च भवतः ।

[६९] कारिकाशब्दस्योपसङ्ख्यानम् । (म.भा. १.३४२)

कारिकाकृत्य । कारिकाकृतम् । [7]यत्कारिकाकरोति ।

[७०] पुनश्चनसौ छन्दसि गतिसञ्ज्ञौ भवत इति वक्तव्यम् । (म.भा. १.३४२)

पुनरुत्स्यूतं वासो देयम् (मै. १.७.२)। 'गतिर्गतौ' (८.१.७०/३९७७) इति निघातो भवति । '(उशिग्दूतः) चनो[8] हितः' (ऋ. ३.११.२) । 'गतिरनन्तरः' (६.२.४९/३७८३) इति स्वरः । गतिप्रदेशाः—'कुगतिप्रादयः' (२.२.१८/७६१) इत्येवमादयः ॥

## ऊर्यादिच्विडाचश्च । (६१/७६२)

ऊर्यादयः शब्दाः च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसञ्ज्ञा भवन्ति । च्विडाचोः कृभ्वस्तियोगे विधानम् । तत्साहचर्यादूर्यादीनामपि [9]तैरेव योगे [10]गतिसञ्ज्ञा विधीयते । ऊरीउररीशब्दा[11]वङ्गीकरणे विस्तारे च (ग.र. १३६) ।

---

1. प्रगता नायकाः ह. 2. कर्तव्यम् नास्ति अ. 3. प्रत्ययः इत्यधिकम् फ. 4. प्रकरोति अ, प्रहृत्य प्रहृतम् प्रहरति इत्यधिकम् ह. 5. उरी ड. 6. प्रसृज्यते फ. 7. यत् नास्ति ह. 8. उताचनोदितः फ, चनोकं ह. 9. तैर्योगे ह. 10. गतिः सञ्ज्ञायते ब, गतिसञ्ज्ञा विज्ञायते अ.ह. 11. अङ्गीकृतौ ह.